# .. shrIdattAtreyatantram ..

# ॥ श्रीदत्तात्रेयतन्त्रम् ॥

अथ प्रथमः पटलः ।
ईश्वरदत्तात्रेयसंवादः
श्रीदत्तात्रेय उवाच
कैलाशशिखरासीनं देवदेव महेश्वरम्(var) जगद्गुरुम् Ka
दत्तात्रेयस्तु पप्रच्छ शंकरं लोकशंकरम् ॥ १॥
कृतांजलिपुटो भूत्वाऽपृच्छत्(var) पृच्छते
Ka स भक्तवत्सलम् । भक्तानां च हितार्थाय तन्त्रकल्पश्च
कथ्यताम्(var) कल्पतन्त्रं प्रकथ्यताम् Ka ॥ २॥
कलौ सिद्धं महाकृत्यं(var) सिद्धिप्रदं कल्पं Ka
तन्त्रविधाविधानकम् ।
कथयस्व महादेव देवदेव महेश्वर ॥ ३॥
सन्ति नानाविधा लोके यन्त्रमन्त्राभिचारकाः ।
आगमोक्ताः पुराणोक्ता वेदोक्ता डामरे तथा ॥ ४॥
उड्डीशे मारीततन्त्रे(var) मेरुतन्त्रे Ka
च कालीचण्डीश्वरे मते(var) चण्डैश्वरे
तथा Ka । राधातन्त्रे तथोच्छिष्टे(var) च देवेष
Ka । धारातन्त्रे मृडेश्वरे(var) अमृतेश्वरे Ka ॥ ५॥
ते सर्वे कीलनं कृत्वा(var) कीलिताश्चैव Ka
कलौ वीर्यविवर्जिताः ।
कामक्रोधवशीभूता ब्राह्मणास्तस्य हेतबः(var) ब्राह्मणाः
क्रामक्रोधाद्या एतस्मादेव कारणात् Ka ॥ ६॥
विना कीलकमन्त्राश्च तन्त्राश्च कथिताः
शिव(var) कीलकेन विना मन्त्रान् कार्यसिद्धिप्रदान्नृनाम् Ka ।
मन्त्रविद्या क्षणात्सिद्धिः, कृपां कृत्वा वदस्वं मे
(var) कथयस्व
मम प्रभो Ka ॥ ७॥
ईश्वर(var) शिव Ka उवाच
श्रणु सिद्धिं महायोगिन्! सर्वयोगविशारद ।
तन्त्रविद्या महागुह्या(var) महागुप्तां Ka देवानामपि
दुर्लभा ॥ ८॥
तवाग्रे कथिता देव(var) कथितो ह्येव Ka !
तन्त्रविद्याशिरोमणिः ।

गुह्याद्गुह्या(var) गुह्यं Ka महागुह्या गुह्या
गुह्या(var) गुह्यं
गुह्यं गुह्यं Ka पुनः पुनः ॥ ९ ॥
गुरुभक्ताय दातव्या नाभक्ताय कदाचन ।
मम भक्त्येकमसे(var) कमनल
Ka दृढचित्तयुताय च ॥ १० ॥
शिरो दद्यात्सुतं दद्यान्न दद्यात्(var) दद्यातन्नदद्यात् Ka
तन्त्रकल्पकम् ।
यस्मै कस्मै न(var) द Ka दातव्यं नान्यथा मम भाषितम् ॥ ११ ॥
अथातः सम्प्रवक्ष्यामि दत्तात्रेय! तथा शृणु ।
कलौ महामन्त्रसिद्धिर्विना(var) सिद्धिर्महामन्त्रो विना Ka कीलेन
कथ्यते ॥ १२ ॥
न तिथिर्न चक्षत्रं(var) च नक्षत्रं Ka नियमो नास्ति
वासरः ।
न व्रतं नियमो होमः कालवेलाविवर्जितम्(var) न जपो होमो न च
कालादिनिर्णयः Ka ॥ १३ ॥
केवलं तन्त्रमन्त्रेण ह्यौषधी(var) ह्योषधी Ka
सिद्धिदायिनी(var) सिद्धिरूपिणी kha ।
यस्याः साधनमात्रेण क्षणात्सिद्धिश्च जायते ॥ १४ ॥
मारणं मोहनं स्तम्भो विद्वेषोच्चाटने(var) विद्वेषोच्चाटनं Ka
वशम् ।
आकर्षणं चेन्द्रजालं यक्षिणीं च रसायनम् ॥ १५ ॥
कालज्ञानमनाहारं साहारं निधिदर्शनम् ।
म्टवत्सासु वन्ध्यासु पुत्रयोगोपपादनम्(var) बन्ध्या पुत्रवतीयोगं
मृतवत्सासुजीवनम् Ka ॥ १६ ॥
जयवादं वाजिकरं(var) वाजिकरणं Ka भूतविग्रह
निवारणम्(var) भूतग्रहनिवारणम् Ka । सिंहव्याघ्रभयं
सर्पवृश्चिकानां तथैव च ॥ १७ ॥
निवारणं भयात्तेषां(var) विषादिनाशनं चैव Ka
नान्यथा मम भाषितं ।
गोप्यं गोप्यं महागोप्यं गोप्यं गोप्यं पुनः पुनः ॥ १८ ॥
अथ(var) नास्ति Ka सर्वोपरि मन्त्रः ॐ
परब्रह्मपरमात्मने
नमः । ॐ उत्पत्तिस्थितिप्रलयकरायब्रह्म(var) प्रलयकारकराय
ब्रह्म Ka हरिहराय त्रिगुणात्मने
सर्वकौतुकनिदर्शनाय

दत्तात्रेयाय नमः(var) सर्वकौतुकानि दर्शय दर्शय । दत्तात्रेयाय नमः । एकलक्षजपात्सिद्धिः । अष्टोत्तरशतजपात्कार्यसिद्धिः । Ka । तन्त्रसिद्धिं कुरु कुरु स्वाहा । मन्त्रजपविधिः । अयुतजपात्सिद्धिर्भवति । अष्टोत्तरशतजपात्कार्यसिद्धिर्भवति ॥

श्री दत्तात्रेयतन्त्रे शिवदत्तात्रेअसंवादे प्रथमः पटलः समाप्तः ।

अथ द्वितीयः पटलः

मारणप्रयोगा(var) मरणाभिधानः Ka

ईश्वर उवाच

अथाग्रे सम्प्रवक्ष्यामि प्रयोगं मारणभिधम् ।
सद्यः सिद्धिकरं नृणां शृणुष्वावहितो मुनेः ॥ १॥
मारणं न व्ठा कार्यं यस्य कस्य(var) यस्य Ka कदाचन ।
प्राणानां संकटे(var) प्राणान्तसंकटे Ka जाते कर्तव्यं भूतिमिच्छता ॥ २॥
मूर्खण तु कृते तन्त्रे तत्स्वमेव(var) स्वस्मिन्नेव Ka समापयेत् ।
तस्माद्रक्षेत्सदात्मानं मारणं न क्वचिच्चिरेत् ॥ ३॥
(var) इदं श्लोकः षडस्ति Ka । तस्माद्रक्ष्यः स वात्मा हि मारणं न क्वचिच्चरेत् ।
कर्त्तव्यं मारणं चेत् स्याद्विधिक्त्यं समाचरेत् ॥ ५॥ विषयुक्तं चिताभस्म(var) चिन्ताभस्मसनायुक्त Ka
धत्तूरचूर्णसंयुतम्(var) संयुक्तम् Ka ।
यस्याञ्ग्गे निक्षिपेद्भौमे सद्यो याति यमालयम्
(var) लये Ka ॥ ४॥ (var) इदं श्लोकः चतुर्थिः Ka ब्रह्मात्मानं तु
विततं(var) विदितं Ka दृष्टवा विज्ञानचक्षुषा ।
मारणं न कार्यं नित्यमन्यथा दोषभाग्(var) सर्वत्र मारणं कार्यनन्यथा दोषभाग्भवेत् Ka ॥ ५॥
(var) इदं श्लोकः सप्तः Ka भल्लातकोद्भवं तैलं कृष्णसर्पस्य दन्तकम् ।
विषं धत्तूरसंयुक्तं यस्याञ्ग्गे निक्षिपेन्मृतिः ॥ ६॥
(var) इदं श्लोकः अष्टमः Ka नरास्थिचूर्णं
(var) चूर्णैः Ka ताम्बूले(var) ताम्बूलं Ka ।
भुक्ते(var) भुक्तं मृत्युकरं ध्रुवम् ।
सर्पास्थिचूर्णं यस्याञ्ग्गे क्षिपेन्मृत्युमवाप्नुयात् ॥ ७॥
(var) इदं श्लोकः नवमः Ka चिताकाष्टं

गृहीत्वा तु भौमे च भरणीयुते ।
निखनेच्च गृहद्वारे मासान्मृत्युर्भविष्यति ॥ ८॥
(var) इदं श्लोकः दशमः Ka कृष्णसर्पवसा
ग्राह्या तद्वर्तिं ज्वालयेन्निशि ।
धत्तूरबीजतैलेन कज्जलं(var) कज्जले Ka नृकपालके ॥ ९॥
(var) इदं श्लोकः एकदशमः Ka चिताभस्मसमायुक्तं
लवणं पंचसंयुतम्(var) पंचसंयुक्तम् Ka ।
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम्(var) यमालये Ka ॥ १०॥
(var) इदं श्लोकः द्वदशमः Ka गृहीत्वा वार्श्चिकं
(var) वृश्चिकं Ka मांसं घूक मांससमन्वितम्
(var) मासमुलूकचूर्णसम्युतम् Ka ।
यस्याङ्गे निक्षिपेच्चूर्णं नरो मृत्युं गमिष्यति(var) तस्य तद्युर्भविष्यति Ka ॥ ११॥
(var) इदं श्लोकः चतुर्दशमः Ka घूकविष्टा तु
संग्राह्या(var) उल्लुविष्ठां गृहीत्वा तु Ka
बिसचूर्णसमन्विता(var) विषचूर्णसमन्विताम् Ka ।
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम् ॥ १२॥
(var) इदं श्लोकः पञ्चदशमः Ka खरविष्ठा
तु संग्राहह्या बिसचूर्णसमन्विता(var) खरविष्ठां
संगृहह्य विषपूर्णसमन्वितां Ka ।
यस्याङ्गे निक्षिपेच्चूर्णं सद्यो याति यमालयम् ॥ १३॥
(var) इदं श्लोकः त्रयदशमः Ka लिखेत्पञ्चदशीयन्त्रं
चिताभस्म विलोमतः ।
श्मशानाग्नौ क्षिपेद्यन्त्रं भौमे च म्रियते रिपुः ॥ १४॥
यन्त्रशक्ति

| | | |
|---|---|---|
| ८ | १ | ६ |
| ३ | ५ | ७ |
| ४ | ९ | २ |

(var) इदं श्लोकः षडशमः Ka रिपुविष्टां गृहीत्वा
तु(var) च Ka नृकपाले च(var) तु Ka ।धारयेत् ।
उद्याने निख्यनेद्भूमौ यस्य नाम लिख्येत्स हि ॥ १५॥
(var) इदं श्लोकः सप्तदशमः Ka यावच्छुष्यति सा विष्ठा

तावच्छत्रुर्(var) शत्रूर् Ka मृतो भवेत् । (var) इदं
पदं Ka नास्ति । श्यस्मै कस्मै न दातव्यं
नान्यथा मम भाषितम्घ ॥ १६ ॥
(var) इदं श्लोकः अष्टदशमः Ka कृकलासबसातैलं
(var) सरटस्य वसातैलं Ka यस्याङ्गे बिन्दुमात्रतः ।
निःक्षिपेन्म्रियते शत्रुर्यदि शक्रोऽपि रक्षति ॥ १७ ॥
(var) इदं श्लोकः नवदशमः Ka विजया मिश्रं लवणं(var)
लवणं विजयायुक्तं Ka गृहदीपे तु निक्षिपेत् ।
यस्य नाम्ना क्षयं याति मासमध्ये न संशयः ॥ १८ ॥
ॐ नमः कालरूपाय अमुकं(var) शत्रुं Ka
भस्मी कुरु
कुरु स्वाहा ।
(var) एव भवतीति Ka नास्ति । श्एक लक्षजपात्सिद्धो भवति ।
अष्टोत्तरशतजपात्कार्यसिद्धिर्भवति ॥
श्री दत्तात्रेयतन्त्रे मारणाप्रयोगः द्वित्यः पटलः समाप्तः ।
अथ तृतीयः पटलः
मोहनप्रयोगाः(var) मोहनाभिधानः Ka
ईश्वर उवाच
अथाग्रे कथयिष्यामि(var) अथातः सम्प्रवक्ष्यामि
Ka प्रयोगं मोहनाभिधम् ।
सद्यः सिद्धिकरं नृणां शृणु योगीन्द्र यत्नतः ॥ १ ॥
तुलसीबीजचूर्णं तु सहदेव्या रसेन सह(var) च Ka ।
रवौ यस्तिलकं कुर्यान्मोहयेत्सकलं जगत् ॥ २ ॥
हरितालं चाश्वगन्धां पेषयेत्कदलीरसे(var) कदलीरसैः Ka ।
गोरोचनेन संयुक्तं तिलके(var) तिलकं Ka लोकमोहनम् ॥ ३ ॥
शृङ्गि(var) शृङ्गी Ka चन्दनसंयुक्तो
वचाकुष्ठसमन्वितः ।
धूपौ(var) धूपो Ka गेहे तथा वस्त्रे मुखे चैव विशेषतः ॥ ४ ॥
राजा प्रजा पशुपक्षि(var) पशुः पक्षी Ka दर्शनान्मोहकारकः ।
गृहीत्वा मूलताम्बूलं तिलकं लोकमोहनम् ॥ ५ ॥
सिन्दूरं कुङ्कुमं चैव गोरोचनसमन्वितम् ।
धात्रीरसेन सम्पिष्टं तिलकं लोकमोहनम् ॥ ६ ॥
(var) इदं श्लोकः Ka अष्टमः । सिन्दूरं च श्वेत वचा
ताम्बुलरसपेषिता(var) श्वेतार्कमूलं सिन्दूर येषयेर कदलीरसैः
सहदेविका Ka ।
अनेनैव तु मन्त्रेण तिलकं लोकमोहनम् ॥ ७ ॥ (var) इदं श्लोकः

Ka नवमः । अपामार्गो भृङ्गराजो लाजा
(var) भृङ्गराजमपामार्ग लज्जालू Ka च सहदेविका ।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ॥ ८ ॥
(var) इदं श्लोकः Ka दशमः । श्वेतदूर्वां गृहीत्वा तु
हरितालं च पेषयेत् ।
एभिस्तु तिलकं कृत्वा त्रैलोक्यं मोहयेन्नरः ॥ ९ ॥
(var) इदं श्लोकः Ka सप्तमः । मनःशिला च कर्पूरं
पेषयेत्कदलीरसे(var) रसैः Ka । तिलकं मोहनं
नृणां नान्यथा मम भाषितम् ॥ १० ॥
अथ कज्जलविधानम्
गृहीत्वौदुम्बरं पुष्पं वर्तिं कृत्वा विचक्षणैः
(var) विचक्षणः Ka ।
नवनीतेन प्रज्वाल्य कज्जलं कारयेन्निशि ॥ ११ ॥
कज्जलं चांजयेन्नेत्रे मोहयेत्सकलं(var) तच्च
चाज्जयेन्नेत्रे
मोहनं सर्वतो Ka जगत् ।
यस्मै कस्मै न दातव्यं देवानामपि दुर्लभम् ॥ १२ ॥
अथ लेपविधानम्
श्वेतगुञ्जारसे पेष्यं ब्रह्मदण्डीयमूलकम् ।
शरीरे लेपमात्रेण मोहयेत्(var) लेपमात्रे
शरीराणां मोहनं Ka सर्वतो जगत् ॥ १३ ॥
बिल्वपत्रं गृहीत्वा तु छायाशुष्कं च(var) तु Ka कारयेत् ।
कपिलापयसा युक्तं(var) कपिलापयसम्युक्ताम्
Ka वटीं कृत्वा तु गोलकम्(var) गोलकीम् Ka ॥ १४ ॥
एभिस्तु(var) एतया Ka
तिलकं कृत्वा मोहयेत्(var) मोहनम् Ka सर्वतो
जगत् ।
क्षणेन मोहनं याति प्राणैरपि(var) प्राणैरपति(?)
Ka धनैरपि ॥ १५ ॥
श्वेतार्कमूलमादाय श्वेतचन्दनसंयुतम् ।
अनेन लेपयेद्देहं मोहयेत्सकलं(var) मोहनम् सर्वतो Ka जगत् ॥ १६ ॥
विजयापत्रमादाय श्वेतसर्षपसंयुतम् ।
अनेन लेपयेद्देहं मोहयेत्सकलं(var) मोहनम् सर्वतो Ka जगत् ॥ १७ ॥
गृहीत्वा तुलसीपत्रं छायाशुष्कं तु कारयेत् ।
अश्वगन्धासमायुक्तं विजयाबीजसंयुतम् ॥ १८ ॥
कपिलादुग्धसार्द्धेन(var) सार्धेन Ka वटी

टकप्रमाणतः ।
भक्षिता प्रातरुत्थाय मोहयेत्सकलं(var) मोहनम्
सर्वतो Ka जगत् ॥ १९ ॥
कटुतुम्बीबीजतैलेन(var) बीजतैलं Ka
ज्वालयेत्पटवर्तिकाम् ।
कज्जलं चांजितं नेत्रे मोहयेत्सकलं(var) चाज्जयेन्नेत्रं मोहनम्
सर्वतो Ka जगत् ॥ २० ॥
पंचांगदाडिमीं(var) पञ्चश्ङ्गां दाडिमीं Ka
पिष्ट्वा श्वेत गुंजासमन्वितम्(var) गुञ्जसमान्वितम् Ka ।
एभिस्तु(var) तेनैव Ka तिलकं कृत्वा मोहयेत्सकलं जगत् ॥ २२ ॥
मन्त्रस्तु
ॐ नमो भगवते रुद्राय सर्वजगन्मोहनं कुरु कुरु स्वाहा ।
अथवा
ॐ नमो भगवते कामदेवाय यस्य यस्य दृश्यो भवामि
यश्च यश्च मम
मुखं पश्यति तं तं मोहयतु स्वाहा ।
विद्धिः - अयुतजपात्सिद्धो भवति ।
अष्टोत्तरशतजपात्प्रयोगसिद्धो भवति ॥
इति दत्तात्रेयतन्त्रे ईश्वरदत्तात्रेयसंवादे
मोहनप्रयोगकथनं नाम तृतीयः
पटलः समाप्तः ॥ ३ ॥(var) श्री दत्तात्रेयतन्त्रे मोहनप्रयोगनामकः
तृतीयपटलः समाप्तः Ka ।
अथ चतुर्थः पटलः
स्तम्भनप्रयोगाः(var) स्तम्भनाभिधानः Ka
ईश्वर उवाच
अथाग्रे कथयिष्यामि प्रयोगं स्तम्भनाभिधम् ।
यस्यः साधनमात्रेण सिद्धिः करतले भवेत् ॥ १ ॥
आताग्निस्तम्भनम्
तत्रादौ सम्प्रवक्ष्याम्यग्निस्तम्भनमुत्तमम् ।
यस्मै कस्मै न दातव्यं नान्यथा मम भाषितम् ॥ २ ॥
वसां गृहीत्वा माण्डूकीं कौमारीरसमिश्रिताम् ।
लेपमात्रे शरीराणामग्निस्तम्भन प्रजायते ॥ ३ ॥
अर्कदुग्धं गृहीत्वा तु(var) सामादाय Ka
कौमारीरसमिश्रितम्(var) कुमारी Ka ।
लेपमात्रे शरीराणामग्निस्तम्भन प्रजायते ॥ ४ ॥
कदलीरसमादाय कौमारीरसमिश्रितम्(var) कुमारीरसपेषितम् Ka ।

लेपमात्रे शरीराणामग्निस्तम्भन प्रजायते ॥ ५॥
मण्डूकस्य वसा ग्राह्या कर्पूरेण च(var) एव Ka
संयुता ।
लेपमात्रे शरीराणामग्निस्तम्भन प्रजायते ॥ ६॥
कुमारीकन्दमादाय कदलीकन्दसंयुतम् ।
लेपमात्रे शरीराणामग्निस्तम्भन प्रजायते ॥ ७॥
कुमारीरसयुक्तेन तैलेनाभ्यङ्गमाचरेत् ।
अग्निना न देहदङ्गमग्निस्तम्भः प्रजायते ॥ ८॥
कुमारीरसलेपेन किंचिद्वस्तु न दह्यते ।
अग्निस्तम्भनयोगोऽयं नान्यथा मम भाषितम् ॥ ९॥
पिप्पलीमरीचीशुण्डीश्चर्वयित्वा(var) शुण्ठी Ka
पुनः पुनः ।
दीप्ताङ्गारं(var) दीप्ताङ्गारे Ka नरैर्भुक्ते न
वक्त्रं दह्यते क्वचित् ॥ १०॥
आज्यं शर्करया पीत्वा चर्वयित्वा(var) चर्ययित्क(?) Ka
च नागरम् ।
तप्तलोहं मुख्ये क्षिप्तं न वक्त्रं दह्यते क्वचित् ॥ ११॥
अथाग्निस्तम्भनमन्त्रः
ॐ नमो अग्निरूपाय मम शरीरे स्तम्भनं(var) शरीरस्तम्भनं Ka
कुरु कुरु स्वाहा ।
विद्धिः - अयुतजपात्सिद्धिर्(var) सिद्धो
Ka भवति । अष्टोत्तरशतजपात्प्रयोगसिद्धिर्
(var) प्रयोगाः सिद्धो Ka भवति ॥
अथ आसानस्तम्भनम्(var) आसानस्तम्भनाऽभिधानम्
Ka चर्मकारस्य कुण्डानां मलं ग्राह्यं तथा रजः ।
चकारुधिरैर्युक्तं(var) चटकारुधिरेर् Ka यस्याग्रे
तद्विनिक्षिपेत् ॥ १॥ तस्य स्थाने भवेत्स्तम्भः
सिद्धयोग(var) सिद्धयोगKa
उदाहृतः ।
यस्मै कस्मै न दातव्यो नान्यथा मम भाषितम् ॥ २॥
नृकपाले मृदं क्षिप्त्वा श्वेतगुञ्जां च
निर्वपेत्(var) श्वेतगुञ्जाफलं क्षिप्तं नृकपाले समृप्तिकम् Ka ।
दुग्धेन तस्मिन् संसिक्ते(var) बलौ दत्ते तु दुग्धस्य Ka तस्य
वृक्षो भवेद्यति ॥ ३॥
तस्य शाख्या लता ग्रह्या यस्याङ्गे(var) अग्रे Ka
तां विनिक्षिपेत् । तस्य स्थाने भवेत्स्तम्भः सिद्धयोग(var) सिद्धियोग

Ka उदाहृतः ॥ ४॥
अथ आसनस्तम्भनमन्त्रः
ॐ नमो दिगम्बराय अमुकस्य आसनस्तम्भनं कुरु कुरु स्वाहा ।
अयुत जपान्मन्त्रः सिद्धो भवति ।अष्टोत्तरशतजपात्प्रयोगः
सिद्धो भवति ।
अथ बुद्धिस्तम्भनम्(var) बुद्धिस्तम्भनाभिधानम् Ka अलूक
विष्ठामादाय(var) उल्लूविष्टां गृहीत्वा तु Ka
छाया शुष्कां तु कारयेत् ।
सताम्बूला प्रदातव्या बुद्धिस्तम्भनमुत्तमम् ॥ १॥
भृङ्गराजरसैर्भाव्याः सिद्धार्थाः श्वेतनामकाः(var) Ka
प्रथमसंख्यं द्वित्य करन??॥
एभिस्तु तिलकं कृत्वा बुद्धिस्तम्भनमुत्तमम् ॥ २॥
सहदेवीमपामार्गं लोहपात्रे च पेषयेत् ।
तिलकः सर्वभूतानां बुद्धिस्तम्भनमुत्तमम् ॥ ३॥
भृङ्गराजो ह्यपामार्गः सिद्धार्थाः सहदेविका ।
कोलं वचा च श्वेतार्कः सत्त्वमेषां समाहरेत् ॥ ४॥
लोहपात्रे विनिक्षिप्य त्रिदिनं मर्दयेद्बुधः ।
ललाटे तिलकं कुर्याच्छत्रुबुद्धिः प्रणश्यति ॥ ५॥
अथ बुद्धिस्तम्भनमन्त्रः
ॐ नमो भगवते शत्रूणां बुद्धिं स्तम्भय स्तम्भय स्वाहा ।
एक लक्षजपात्सिद्धो भवति मन्त्रः ।
अष्टोत्तरशतजपात्प्रयोगसिद्धिर्(var) सिद्धो Ka भवति ।
अथ शस्त्रस्तम्भनम्(var) शस्त्रस्तम्भनाभिधानम् Ka पुष्यार्के
तु समुद्धृत्य विष्णुक्रान्तां समूलकाम् ।
वक्त्रे शिरसि धार्यते(var) धार्य तत् Ka शस्त्रस्तम्भः प्रजायते
॥ १॥
खर्जूरीमुखमध्यस्था करे बद्धा च केतकी ।
भुजदण्डस्थिते चार्के सर्वशस्त्रनिवारणम् ॥ २॥
वाराहव्याघ्रभूपालचौरशत्रुभयं(var) ऊपाल(?) Ka
जयेत् ।
जातिमूलं मुखे क्षिप्तं शस्त्रस्तम्भनमुत्तमम् ॥ ३॥
करे सुदर्शनामूलं(var) सुन्द्रशनं मूलं Ka
शस्त्रस्तम्भकरं भवेत् ।
केतकीं मस्तके चैव तालमूलं(var) तालूमूले
Ka मुखे स्थितम् ॥ ४॥
एतानि त्रीणि मूलानि चूर्णानि(var) चूर्णितानि Ka

घृते पिबेत् ।
आयातानेकशस्त्राणं समूहं संनिवारयेत् ॥ ५॥
ख्यर्जूरी चरणे हस्ते ख्यश्णगस्तम्भः पेअजायते ॥ ६॥
पुष्यार्के तु समादाय ह्यपामार्गस्य मूलकम् ।
लेपमात्रं(var) लेपमात्रे Ka
शरीराणां सर्वशस्त्रनिवारणम् ॥ ७॥
पुष्यार्के श्वेतगुंजाया मूलमुद्धृत्य धारयेत् ।
हस्ते शस्त्रभ्यं नास्ति सश्णग्रामे न कदाचन ॥ ८॥
गृहीत्वा रविवारे तु बिल्वपत्रे च कोमक्लम् ।
पिष्ट्वा विषं तत्समं च लेपनाच्छस्त्रबन्धनम् ॥ ९॥
अथ शस्त्रस्तम्भनमन्त्रः
ॐ नमो भगवते महाबल पराक्रमाय शत्रूणां
शस्त्रस्तम्भनं कुरु कुरु स्वाहा ।
प्रयोगविधिः
एकलक्षजपान्मन्त्रः सिद्धो भवति नान्यथा ।
अष्टोत्तरशतजपात्प्रयोगः सिद्ध्यति ध्रुवम् ॥ ८॥
अथ शस्त्रलेपनम्
विष्णुक्रान्यीयबीजानि मन्त्रभावेन ग्राहयेत् ।
तत्तैलं ग्राहयेत्पात्रे विषं चैव समन्वितम् ॥ १॥
भल्लाततैल संयुक्तं महिफेनेन संयुतम् ।
खरमूत्रं च संयुक्तं धत्तूरबीजसंयुतम् ॥ २॥
तालस्य रस संयुक्तं गन्धकं च मनः शिलाम् ।
एकीकृत्य तथैतेषां वटिका क्रियते नरैः ॥ ३॥

Encoded by Vlad Sovarel svlad1972@rediffmail.com
Variation in the text is given by marker (var).

---

Please send corrections to sanskrit@cheerful.com
Last updated April 25, 2010
http://sanskritdocuments.org